**19R**

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत विशारद (बी.ए.) – नियमित**

**परीक्षा : मे – २०२४**

**सत्र ६ वे**

**विषयः कादम्बरी** (19R462)

**दिनांक :** २३/०५/२०२४ **गुण :** ६० **वेळ :** स. १०.०० ते १२.३०

**सूचना : सर्व प्रश्न अनिवार्य**

**प्र.१. त्रयाणामनुवादं ससंदर्भं लिखत।** (१८)

१) राजा तु तामार्यां श्रुत्वा संजातविस्मयः सहर्षमासन्नवर्तिनम्, अतिमहार्घहेमासनोपविष्टम्, अमरगुरुमिवाशेष–नीतिशास्त्रपारगम्, अतिवयसम्, अग्रजन्मानम्, अखिलमन्त्रिमण्डलप्रधानामात्यं कुमारपालितनामानमब्रवीत् श्रुता भवद्भिरस्य विहङ्गमस्य स्पष्टता वर्णोच्चारणे, स्वरे च मधुरता! प्रथमं तावदिदमेव महदाश्चर्यं यदयमसंकीर्णवर्णप्रविभागाभिव्यक्तमात्रानुस्वारसंस्कारयोगां विशेषसंयुक्तां गिरमुदीरयति। तत्र पुनरपरमभिमत–विषये तिरश्चोऽपि मनुजस्येव संस्कारवतो बुद्धिपूर्वा प्रवृत्तिः।

२) देव, द्वारस्थिता सुरलोकमारोहतस्त्रिशङ्कोरिव कुपितशतमखहुङ्कारनिपातिता राजलक्ष्मीर्दक्षिणापथादागता चाण्डालकन्यका पञ्जरस्थं शुकमादाय देवं विज्ञापयति ‘सकलभुवनतलरत्नानामुदधिरिवैकभाजनं देवः। विहङ्गमश्चायमाश्चर्यभूतो निखिलभुवनतलरत्नमिति कृत्वा देवपादमूलमादायागताहमिच्छामि देवदर्शनसुखमनुभवितुम्’ इति। एतादाकर्ण्य ‘देवः प्रमाणम्’ इत्युक्त्वा विरराम। उपजातकुतूहलस्तु राजा समीपवर्तिनां राज्ञामालोक्य मुखानि ‘को दोषः, प्रवेश्यताम्’ इत्यादिदेश।

३) एवं च क्रमेण निर्वर्तिताभिषेको विषधरनिर्मोकपरिलघुनि धवले परिधाय धौतवाससी शरदम्बरैकदेश इव जलक्षालननिर्मलतनुः, अतिधवलजलधरच्छेदशुचिना दुकूलपट्टपल्लवेन तुहिनगिरिरिव गगनसरित्स्रोतसा कृतशिरोवेष्टनः, संपादितपितृजलक्रियो मन्त्रपूततोयाञ्जलिना दिवसकरमभिप्रणम्य देवगृहमगमत्। उपरचितपशुपतिपूजश्च निष्क्रम्य देवगृहान्निर्वर्तिताग्निकार्यो विलेपनभूमौ चन्दनेनानुलिप्तसर्वाङ्गो कृतवस्त्रपरिवर्तो रत्नकर्णपूरमात्राभरणः समुचितभोजनैः सह भूपतिभिराहारमभिमतरसास्वादजातप्रीतिरवनीपो निर्वर्तयामास।

४) कटु क्वणन्तो मलदायकाः खलास्त्युदन्त्यलं बन्धनशृङ्खला इव।
मनस्तु साधुध्वनिभिः पदे पदे हरन्ति सन्तो मणिनूपुरा इव।।
सुभाषितं हारि विशत्यधो गलान्न दुर्जनस्यार्करिपोरिवामृतम्।
तदैव धत्ते हृदयेन सज्जनो हरिर्महारत्नमिवातिनिर्मलम्।।

**प्र.२. ससंदर्भं स्पष्टीकरणं कुरुत। (केवलं चत्वारि)** (२४)

१) गङ्गाप्रवाह इव भगीरथपथप्रवृत्तः।
२) कथमियमक्लिष्टता लावण्यस्य।
३) वैशम्पायनस्य आर्या।
४) सुतो बाण इति व्यजायत।
५) अपनयतु नः कुतूहलम्।

**प्र.३. टिप्पणीद्वयं लिखत।** (१२)

१) शूद्रकस्य राजधानी। २. राज्ञः बाल्यकालः। ३. कुमारपालितस्याक्षेपः।

**प्र.४. योग्यशब्दानां चयनं कृत्वा पुनर्लिखत।** (०६)

१) समुपजातविस्मयस्याभून्मतसि …………। (राज्ञः, महीपतेः, भूपस्य)
२) तस्य ………… कृपाणधाराजले चिरमुवास राजलक्ष्मीः। ( निर्मले, मलहीने, विमले)
३) अत्यन्तशुद्धस्वभावमपि …………। (देवचरितम्, कृष्णचरितम्, धर्मचरितम्)
४) सः ………… उपेतः निशामनैषीत्। (मित्रैः, सखीभिः, सुहृद्भिः)
५) सकलरत्नानाम्………… एकभाजनं देवः। (सागरः, पारावारः, उदधिः)
६) पतिप्रेम्णा ………… हृदयेन उह्यमानः। (क्षमया, वसुंधरया, धरण्या)

----------